# Shri Krishnakritam Shrikrishnanarayana Stotram

# શ્રીકૃષ્ણકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Shri Krishnakritam Shrikrishnanarayana Stotram

File name : kRRiShNakRRitaMshrIkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 39/38-56||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શ્રીકૃષ્ણકૃતં શ્રીકૃષ્ણનારાયણસ્તોત્રમ્

શ્રીકૃષ્ણસ્તં કૃષ્ણનારાયણં પુપૂજ સાદરમ્ ॥ ૩૮॥

સુરવાલં પીતપટં કઞ્ચુકં સ્વર્ણતારકમ્ ।
શિરસ્ત્રાણં સકલ્ગિં ચાવતંસકૌ કૌસુમૌ શુભૌ ॥ ૩૯॥

પુષ્પહારાન્ પારિજાતકૃતાન્ દદૌ ગલેઽર્ભકમ્ ।
ઉપાનહૌ સ્વર્ણસાધ્યૌ કોમલૌ પ્રદદૌ તથા ॥ ૪૦॥

છત્રં સુચામરે રમ્યે રશનાં કુણ્ડલે દદૌ ।
મણિં કૌસ્તુભજાતીયોત્તમં માલાં ચ મૌક્તિકીમ્ ॥ ૪૧॥

દદૌ શ્રીબાલકૃષ્ણાય વંશીં દદૌ મૃદુસ્વરામ્ ।
યષ્ટિં સિદ્ધિમયીં ચાપિ દદૌ સિંહાસનં વરમ્ ॥ ૪૨॥

એવં બાલપ્રભું કૃષ્ણઃ પૂજયિત્વા સ્તુતિં વ્યધાત્ ।
સર્વસાક્ષિન્નમસ્તેઽસ્તુ સર્વાવતારકારણ ॥ ૪૩॥

પુરુષોત્તમ મુક્તેશ પરધામન્ નમોઽસ્તુ તે ।
વર્તમાનં ચ ભૂતં ચ ભવિષ્યત્સર્વથા યતઃ ॥ ૪૪॥

અન્વિતં રાજતે સૌમ્યં સુવ્યવસ્થં ક્રમાનુગમ્ ।
અનન્વિતઃ પ્રશાસ્તા ત્વં તસ્મૈ દેવાય તે નમઃ ॥ ૪૫॥

અનન્તાઃ શક્તયસ્તેઽત્ર કૃષ્ણનૃસિંહરૂપિષુ ।
રાધારમાશ્રીસ્વરૂપાસ્તં નમામિ પરેશ્વરમ્ ॥ ૪૬॥

અહં મે ધામ ગોલોકસ્તથા નારાયણો રમા ।
શ્રીર્વૈકુણ્ઠં ચામૃતં સત્પદં યસ્માત્પ્રવર્તતે ॥ ૪૭॥

અક્ષરં ધામ યસ્યાઽગ્રે સમૂર્તં સેવકં સદા ।
ઈશ્વરા અવતારાશ્ચ યદંશગુણભૂષણમ્ ॥ ૪૮॥

વ્યૂહાશ્ચેશ્વરપાલાશ્ચ લોકપાલા મહર્ષયઃ ।

ક્રતૂચ્છ્રયાઃ સુરા યસ્ય ગુણૈકૈકાંશમૂર્તયઃ ॥ ૪૯॥

ભવન્તીહ તુ સંસારે તં નમામિ પરેશ્વરમ્ ।
અન્તરાત્મન્નનન્તાત્મન્મદાત્મઁસ્તે નમો નમઃ ॥ ૫૦॥

ત્વં પરાત્મન્ લોકસાક્ષિન્નનન્તેશ નમોઽસ્તુ તે ।
સર્વજ્ઞ ત્વં પરમેષ્ઠિન્ જ્ઞાનજ્ઞેય નમોઽસ્તુ તે ॥ ૫૧॥

આદિદેવ દુરારાધ્ય પરમેશ્વર તે નમઃ ।
મહાયોગેશ્વર સાધો દયાલો તે નમો નમઃ ॥ ૫૨॥

પરજ્યોતિર્વષટ્કાર સ્વાહાકાર નમોઽસ્તુ તે ।
સર્વદર્શન સંવર્તાઽગ્નિષોમાત્મન્નમોઽસ્તુ તે ॥ ૫૩॥

મહારાજિક સિદ્ધાર્ચ્ય હિરણ્યવાહ તે નમઃ ।
મઞ્જુકેશિન્ બાલકેશિન્ દયાદેશિન્નમોઽસ્તુ તે ॥ ૫૪॥

વિભો યાજ્ઞિક યજ્ઞેશ ભક્તાનુકમ્પ તે નમઃ ।
પ્રસીદ શ્રીકૃષ્ણનારાયણ તુભ્યં નમો નમઃ ॥ ૫૫॥

ઇત્યુક્ત્વા શ્રીકૃષ્ણદેવો નત્વા રાધા તથા પ્રભુમ્ ।
યયતુઃ શ્રીકમ્ભરાયાઃ સન્નિધૌ ભુવનાન્તરે ॥ ૫૬॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ ત્રેતાયુગસન્તાનાત્મકસ્ય
દ્વિતીયખણ્ડે ૩૯-અધ્યાયાન્તર્ગતં શ્રીકૃષ્ણકૃતં
શ્રીકૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૩૯/૩૮-૫૬॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 39/38-56..

Proofread by PSA Easwaran

*Shri Krishnakritam Shrikrishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*